इति द्विर्वचनोच्चारणाद्वे पदे समु + अन्यथा ह्यपमिति वक्तव्य स्यात्। तेनाय च न पच न्निति उ
मुद्दवृक्षान् दृक्षानिति णत्वनिषेधः। अग्ने ३ ग्नेरत्य उः पदान्तादतीति पूर्वरूपं च सिध्यति। अग्नी
ताग्नीत अतो गुणे अपदान्त प्रयुक्तो न भवति। द्वितीयपक्षे तु प्रत्येकं पदसंज्ञास्त्येवा समुदा
यस्य तु इत्यं पचसी स्वादौ हि स एव धातुः प्रत्ययपञ्चमिः पठ्यते न तथ्वयस्मात्स्वत्ययो विहितः त
दानितं दतमिति विप्रतीमानासमुदायस्यापि प्रवर्तते। परं तु अस्मिन्पक्षे पोजः पुन्यं पोनः पुनिकं इ
ति समुदायालक्षणत्रोरनुपत्तिप्रसंगः तथा हि। अंतरंगत्वात्सुवलुक्कृते द्वित्वं प्रवर्तते। किंच
तत्रैकपद्याभावे पुनः ३ पुनेरित्यवग्रहो न सिध्येत्। तस्मादाद्य एव पक्षो युक्त इत्याह। एकपदस्येति
इदं पदस्येवेति उत्तरत्र क्रियमाणः पदस्येत्यधिकार इह कर्तव्य इति वार्त्तिककारस्य सिद्धान्तः। ननु

वाक्यस्येति· किंच नित्यतायां विधीयमानं द्वित्वं धातुमात्रस्य न भवति· पनु पदस्येत्युच्यमानं द्वित्वं
३४ बहिरंगं धातौ यङ् न बाधते· अन्यथा भृशार्थे सावकाशो यङ्· पौनःपुन्ये परेण द्वित्ववचनेन बाध्ये
तेति तन्न क्रियासमभिहारे द्वे इति वचनेन भृशार्थेपि द्वित्वविधानात् यङ्द्वित्वयोर्वचनात् सर्वो
र्योपस्य सिद्धत्वात्· सगतिकस्येति· प्रपचतितरामित्यादाव समासपक्षेपि द्वित्वं भवति इम
मेपि पदस्यैव तेन प्रपचतु इति सगतिकस्य धातुमात्रस्य न भवति· णमुलीप्यन्यत्र विधानात्।
यङ् तु क्रियासमभिहारे एव विधीयते इति संदेहभावाद्द्वित्वाभावः। वाक्यामंत्रिते पूर्व
मविद्यमानवदिति माणवकस्याविद्यमानत्वाद्भिस्वकस्यापि वाक्यादित्वाद्द्वित्वं पूर्वस्य
प्लुत इति· विकल्पितो सो इति तत्रैव वक्ष्यते· पर्यायेणेति· तत्र पर्यायेणेति वचनात्तस्य घण्यं वाक्य
स्वरस्तथापि द्वित्वानुरोधादिदं स्तत्र मत्रोपन्यस्तं एवं। नित्यवीप्सयोरित्यनेनेति न तु वाक्यादे
रित्यनेनेन प्रयोजनाभावात्· परस्याम्रेडितानुदात्तत्वे कृते पूर्वपदप्रकृतिस्वरस्य आमंत्रिता
द्युदात्तत्वस्य सिद्धत्वात्· यद्यपि पुंवद्भावः प्रयोजनं संभवति· तथापि अत्र वीप्साग्रहणमनु हेरंब
वृत्त्य वीप्सायां द्वित्वं बव्रीहिवद्भावश्चानेन विधीयत इति भाष्ये सिद्धांतितत्वादन्यद्वित्वेब
हुव्रीहिवद्भावो नेति समाधानं कर्तव्य एकैकपेति· एकैकये सर्वग्रहः पद्यये कायोलिदेशस्त ३२
दिनकोपधाया इति षेधबाधितत्वात् परत्वात्पुंवद्भावेनैव भाव्यं। यदि गणस्थानिदेश स्तर्हि सर्वेना

न्तोऽहल्लिमात्रे इति पुंवद्भावः आबाकार्यातिदेशोऽयमिति। अणस्त्रादिदेशपक्षे तु विरुद्धस्य स्वाश्रयस्या
तिदेशेन निवर्त्तनान्नाम्रेडितानुदात्तत्वं भवतीत्याहुः। वस्तुतस्तु कृतेप्याम्रेडितानुदात्तत्वेन दो
षः। कर्म। बहुव्रीहिवद्भावानुवर्त्तनेनैव सिद्धेपि कोपधे पुंवद्भाव... बाधार्थमिदं तदपि कार्यातिदेशे
न सिद्धे समासान्तोदात्तत्वमुख्यं प्रयोजनं कार्यानिर्देशोऽयमिति। अणस्त्रातिदेशेऽपि विरुद्धस्य स्वा
श्रयस्यातिदेशेन निवर्त्तनान्नैवाम्रेडितानुदात्तत्वं भवति। यदि प्रकारादिद्विरुक्तौ परस्यान्तउ
दात्त इति पिट्टस्तत्रेणान्तोदात्तत्वमिष्यते तदा मास्त्वयमतिदेशः। यद्वा एकमेवार्थं यद्वदति कर्त
व्ये समासान्तोदात्तत्वं तु न भवति प्रकारादिद्विरुक्ताविति नियमात् तथा च दंसूत्रे मास्तु प्रकारे
पूर्वोति। एतयोर्यौ थैः न स्यादिति शायविवक्षायामेतयोरेव बहुवाच्ये इत्यर्थः। स्त्रीलिंगेति। विकृ
तिः संपतिः अन्यत्रापाति भाष्येऽसदापिष्टौ तौ उक्तवादिहोक्तं एवमातिशास्थिकोपि दृश्यते
इत्यपि कर्मव्यतिहारे इति अत्र द्वित्वं नित्यं समासवद्भावएव बहुकं तं। अन्यपरयोरिति। य
द्यपि परशब्दो भाष्ये नोदाहृतः कैयटेन चानुक्तस्तथापि इतरेतरमन्योन्योपपदाच्चेति सूत्रे प
रस्य राच्छ्रेति वार्त्तिकप्रयोगादिहोक्तः। अत्राम्रेडितानुदात्तत्वमेवेति। समासवद्भावाभावात्।
अन्यपरेतरव्यतिरिक्तानां कर्मव्यतिहारे द्वित्वाभावो बहुवचनात्। एवं च द्वित्वमपि बहुत्वमि
ति पूलितं किं च बहुत्ववचनात्तन्त्रिपां पदद्वये स्यपूर्ना। नपुंसके अदभावो न। परस्य रास्विसाद्

ष्यमित्यादौ सोऽर्हुकुन। अकृच्छ्रे प्रियप्रियेणेति। तृतीयैकवचनांतस्य द्विर्वचने कर्मधारयवत्त्वा
33 वात्। सुवल्लुकि पुनस्तदेकवचनं। यनं। यथास्व शब्द इति। ज्ञातिधनवाचिनस्तु नेदं ग्रहणं। द्विर्व
चनस्य तत्रासमर्थत्वात्। द्वित्वमिति। वीप्सायां यथाशब्दस्य वर्णनाद्वित्वप्राप्तौ तदपि निपा
त्यते। इदं इह स्येव ज्ञापात्र प्रयोगे ववीप्सायामिति सिद्धं अन्यत्र तु द्वित्वमपि निपात्यते कर्म
धारयवत्त्वावादंतोदात्तत्वं सर्वत्र। अदंतत्वमिति द्विःशब्दस्य द्वित्वे कृतेऽश्रवद्शक्तित्वाभावा
दर्थांतरत्वात् सर्वनामत्वाभावादत्वाप्राप्तौ निपातनं अतएवैकवचनादि कुसुमद्यते द्वित्वेकृ
ते कर्मधारयवद्भावात्समासांतोदात्तत्वं भवति इतीदं प्रप्रकरणे सन्निधावुपन्यस्तमिति
ति सुबंतस्वरः॥ अथ समासे स्वरः सामान्यानि स्युइत्यादिना पदस्वरमाह। कृनिनं तोराज
न इति तेनाद्युदात्तं इ स्यर्थः। एवं मध्येपिरूपा इवेनेति। सहसुपेत्यत्र योगविभागेन सिद्धस
मासमनूघातुकं। पूर्वपदप्रकृतिस्वरमात्रमनेन विधीयते योगविभागसिद्धस्य सार्वत्रिक
त्वादनित्यत्वाच्चास्यानित्यत्वं। तथा च जीमूतस्येव इति तैत्तिरीये इट थकुपठ्यते। उद्गाहरि हंव
ववामन इतिप्रयस्त प्रयोगाश्च। वृद्धाहृद्धोदात्तस्वरितयग्रहेण मनुवर्त्तमाने तद्धितवर्त्तते पूर्वपद
सामानाधिकरण्यात् तत्र प्रकृत्यत्वेलावदुक्तेपि स्वरप्रकरणात् प्रकृतिस्वरेणैव प्रकृतिभा ३३
वे विज्ञाते पूर्वपदस्य प्रकृतिभावतस्य योरुदात्तस्वरितयोः प्रकृतिभावद्वारेण ताञ्छापयेने सादृ

उदात्तस्वरितयोगीतिवृत्तिकारस्य पूर्वपदं तस्येः विवर्त्तकते उदात्तस्वरितस्यां तुकुसुयुभ्य श्वेति बहुपु
पठ्यते। उणादिवृत्तौ तु सुधातु पूर्वसूत्रे पठ्यते उत्तरसूत्रं तु सुयुभ्यां चेत्येव पठ्यते· समपादर्शनि· न
त्वत्रास्मिन् चरेत्यते पि संभवात्समासान्तोदात्तत्वं भविष्यति· न चैवं प्रियविश्वदश्यादावपि समासां
तोदात्तत्वप्रसंगइतिवाच्यं· एतस्मिन्यदेद्वयोरुदात्तयोरसमावेशस्यज्ञापयिष्यमाणत्वात्· तस्मा
भयोरसंभवात् द्विशेषविहितेन पूर्वपदप्रकृतिस्वरेण समासान्तत्वस्य बाधो मुस्माभिः पादेतु
उभयोःसमावेशेइष्टसिद्धेरुदात्तेत्यादिमास्त्विति चेत्। नैतत्· सत्यपि संभवे विशेषविधिः सामान्यवि
धेर्निवर्त्तकः कोरिव्येन·कुदानंदाधिदानस्येवेति भविष्येउक्तत्वात्। युक्तं चैतत्· अन्यथोदात्तास्व
रितयोरेकस्मिन्यदे समावेशाभावस्यज्ञापकाभावान्मनुष्यनाथइत्यत्रोभयोःसमावेशःस्यात्· त
समेति· हरदत्तस्त्वाह सुओउम्भिमितितेतदुणादिवृत्तौ दृश्यते आयुदात्तेति· अन्यथा गोत्राद
स्यांतोदात्तत्वात् तत्स्थाने·वउतोदात्तस्यात्· न तु गमेओरित्युत्पत्तिपक्षेऽन्तोदात्तःस्यादिति आयु
दात्तो निपात्यते। अत्रके चित्· आद्यन्तवदेकस्मिन्नित्यस्य शास्त्रातिदेशत्वपक्षे ओकारस्य प्रसक्ते
नाद्युदात्तस्याद्युदात्तोऽवइ। अभ्युपत्तौ अन्तोदात्तास्य गेशस्य स्याव उ· अन्तोदात्त इति वक्तव्य। आ
द्यन्तवदितितु कार्यातिदेशः। असत्यं तत्वे साद्विते च उदात्तत्व मात्रमतिदिश्यते तदोकारस्याद्युप

34 देशाभावः कुतः नदादिशः स्याद्युदात्तत्वं उदात्तत्वं चानि प्रतेशं यथा येन स्यादिति पक्षे निष्प्रसंगः इ
त्याद्युदात्तत्वनिपातनं कर्तव्यमिति - तद्भित्वं · धातोरन्तोदात्तस्यान्तोदात्तः पिबादेशः प्राप्नोति । पि
बादेशाद्युदात्तो निपात्यत इति भाष्यविरोधात् । त्रिशब्दस्यान्तोदात्तस्य स्थाने लिट्शब्दोऽन्तो
दात्त इत्यादिस्वग्रन्थविरोधाच्च । बहु । संज्ञायामिति बहुव्रीहिविशेषणेन भ्वशब्दस्य · पूर्वेस्व
रेति पूर्वपदप्रकृतिस्वरस्येत्यर्थः नतु पूर्वसूत्रेण विहितस्यान्तरपदस्य द्वो पूर्वोत्यस्य तत्पुरुष
विषयत्वात् सर्वशब्दविशब्दादिकशब्दविषयत्वाच्च । कृत्तेनत्वाद्वि भ्वनुशब्द आद्युदात्तः उद अत्र पू
र्वपदमिति · नंद्वस्य पदस्येति ज्ञापकात् पूर्वपूर्वोत्तरपदयोः कार्यं इति अत्र पूर्वपदमन्तोदा
त्तपक्ष्वादेकादेशः स एकादेश उदात्तेनोदात्तः स्वरितो वानुदात्त इति स्वरितो वा स्यर्थः इ
दं हि सामान्यापेक्षं ज्ञापकं तेनैकादेशावयवादेशोऽपि पूर्वोत्तरकार्यं नं तरं प्रवर्तते तेनेदं ये हेरंब
वे स्वरः सिद्धः । पक्षे · परत्वादिति · क्षेपे परत्वं अक्षेपेपि पूर्वपदप्रकृतिस्वरं वाधितत्वापवा
दत्वात् नुदः सद रे इत्यत्र नत्रे सुम्नामित्येव भवति नदी · ईहेन्नो ग्रेतिवस्तुतस्तु अत्राद्युदात्त
पक्ष एवयुक्तः । नहि पयस्या द्युदात्तत्वात् एत एते ब्रह्मादेवानाप पदवी विस्पाशेऽपि पुंल्लिंगस्य ३५
ब्रह्मणोतोदात्तत्व । अस्माकं ब्रह्मेतद्रप्रेस्यत्र नपुंसकत्वाद्युदात्तत्वमुत्पत्ति पक्षे सर्वत्रैवा

वाद्युदात्तत्वं स्यात्। निष्ठो। अयमपि स्वर इति कृद्ग्रहणपरिभाषया प्राप्तो तत्शब्दस्य निष्ठांतत्वात्तस्तत्वं स्वोत
रवशब्दस्यांतोदात्तत्वमित्यर्थः। उत्तर० उत्तरस्येति सुपां सुलुगिति लुप्तषष्ठीकं। कर्णो। आद्युदात्तमि
ति। सिद्धार्थकथनमेतत्। उत्तरपदस्य कर्णशब्दस्यादिरुदात्त इत्यक्षरार्थः। एवं चास्मिन्प्रकरणे कर्ण इत्या
दौ षष्ठ्यर्थे प्रथमेति ज्ञेयं। एषां वर्णग्रहणादिति क्ष्यते। नेनेति लक्षणे। वर्णेनापि लक्षणाद्वर्णग्रहण
मनर्थकं स्यात्। इति भावः। कंठ कं ठ इत्यादौ स्वांगत्वादाद्युदात्तौ। ग्रीवा जंघयोः स्वांगत्वेप्यदंतत्वाभा
वादंतोदात्तत्वं। नञो अमित्र इति। अयं बहुव्रीहिश्चेदनेन मध्योदात्तः तत्पुरुषश्चेदव्ययपूर्वपदप्र
कृतिस्वरेणाद्युदात्तः। घ्नलुपमेर्हि षति विदिति इत्र प्रत्ययांतः सोतोदात्तः। अयोपि शत्रुपर्यायः पु
ल्लिंगश्च। अमित्रामित्रमे पुंसीति लिंगानुशासनसूत्रात्। ननु तत्पुरुषस्य परवल्लिंगं प्राप्नो
ति लिंगानुशासनसूत्रं तु औणादिके सावकाशं। न च परवल्लिंगतापि अर्धपिप्पल्यादौ सावका
शेति वाच्यं। तावतापि अमित्रे पंल्लिंगतौ वैत्यत्र पुंस्कभावादिति चेत्। सत्यं। लिंगानुशासनसूत्रे अमि
त्रे एकशेषकृत्वा मित्रादिभिर्द्वंद्वः क्रियते प्रतिपदोक्तविधेर्वलीयस्त्वाद्धा पुंस्त्वं द्वंद्वस्तस्माद्धि षोमित्रे
इति सूत्रे तत्पुरुषस्य ग्रहणे तस्यैकौ वत्वमिच्छाति वहो। वत्वात् ह्रिषः ध्वंशान पुंसकः स्यादित्यौणादि
क एवमित्यप्यतर इति वदन तत्पुरुषस्य न्ली। वत्वामिच्छति। वहो। वहुचिति। बहुत्रांतो। तोदात्तः। सोमं। इत्वस्या
सिद्धत्वादिति। विभक्त्युत्पत्तेः प्रागेवास्मिन्स्वरे तं रंगेकर्तव्ये विभक्तिनिमित्तत्वापदांतत्वाववदिरंगत्वाद्द्व

मसिद्धं । यद्वा पूर्वत्रासिद्धमिति स्वरं प्रति द्वित्वमसिद्धं । ननु वस्वादिषु द्वित्वं सिद्धं वाच्यमिति वचनादुभयो
३५ रपि असिद्धत्वयोर्बाध इति चेत् । न तत्र । सोर्दीर्घत्व इति वचनं श्रोषादत्वासंतस्येति दीर्घविधिप्रत्येव द्
35 त्वस्यासिद्धत्वं न तु स्वरविधिं प्रतीति न दोषः । किं चास्य वचनस्यैव प्रत्याख्यानान्न दोषः । हलु ङ्याब्दिसू
त्रे यद्यपि वस्वादिषु द्वित्वं सिद्धमित्येव सो दीर्घग्रहणं न करिष्यते इत्युक्तं तथापि न तदपि स्थितमित्यदो
षः । स ष्ठापि तिः । प्रत्ययाप्रत्ययेति अत एव सुदषदित्यत्रात्वासंतस्येति दीर्घो न । इत आरभ्य च्यत्वा
रि सञ्ज्ञाणि न स्युर्न्यायमित्यस्यापवादकानि । कृत्वा । पराद्विछंदसि बहुलमित्येव सिद्धे भ्वार्थं सूत्रं
आद्युमो ग्राजीतिवान्नियमार्थमिदमित्याह । आद्युदात्तमेवेति । वीरावित्वे भक्ष्येति । काशि
कायां तु वीर्यग्राद्यस्य यदन्तत्वापतौ नावद्यत्याद्युदात्तत्वात्सर्वेणैव सिद्धे वीर्यत्राद्यं यतो नावद्
ति न प्रवर्त्तते इति ज्ञापनार्थमत्र वीर्यग्रहणमित्युक्तं । तच्चिंत्यं एवं हि भाष्यायाद्युदात्तत्वं न प्रवर्त्तते
ता । छंदस्येव यतो नाव इति न प्रवर्त्तत इति ज्ञापकेन समर्थनायं त्रितेनायं नित्यावद्धं इति । यद्यपि लो
पे कृते अवद्धं उक्तं तथाप्यसौ नित्यावद्धं इति नायं स्वर इति भावः बहु । अत्र तृतीयेति यत्र तृतीयेति हेरंब
पदमनुवृत्त्यार्थे तृतीयासमासं क्रियते सत्पाक्षणिकः अयं योगविभागेन कृतो षितृतीयेति पदो व्यार
णेन कृतत्वात् एवं स्वयं प्रतिपदोक्तः षितस्थम इति । पत्स्व थमे गमनं यस्या । उपात्तस्योपलक्षणमिति ।
इदं हरदत्तेनोक्तत्वादुक्तं । वस्तुतस्तु समासांतानां मुत्तरपदावयवत्वं न समीचीनमिति वक्ष्यते किं च सु ३५

पः प्राकृतप् इति पक्षे प्रथमस्य पदत्वमपि कथं। अपि चोपलक्ष्यस्य प्रथमस्य साक्षादुच्चारणादुपलक्षक
स्योत्तरपदग्रहणस्य किं प्रयोजनं। इदं प्रथमगमनं इत्यत्र द्विपदे त्रिपदे वा बहुव्रीहौ दोषाः स्युः उच्चारणं वा इ
दं प्रथमं इत्यत्र सूत्रस्य चरितार्थत्वादुपलक्षणे प्रमाणं च नास्ति। तस्माद्यत्किंचिदेतत्। संख्याद्विस्तने
ति द्विस्तनी तिनोदाहृतं। न द्विस्वांगाच्चोपसर्जनादिति ङीष्। अंतोदात्तत्व प्रयुक्त एवास्ति। दर्शनीयस्तने
ति द्विस्तनीति नोदाहृतं। न द्विस्वांगाच्चोपसर्जनादिति ङीष्। अंतोदात्तत्व प्रयुक्त एवास्ति। दर्शनीय
स्तनीत्यत्र सति शिष्टत्वात् ङीष्स्वरेणांतोदात्तत्वं भवत्येवापूर्वपदाप्रकृतिस्वरपवादोयं योगः। सं
ज्ञा वहुमित्र इति बहूनि मित्राण्यपि इति विग्रहः। बहूनि मित्राण्यस्येति तु विग्रहेन ञ्बहुशा वे न अस्
यामित्येव सिद्धं ऋषिप्रतिषेध इति। अन्ये तु विश्वमित्रः व्यवायिनो। उदाहरणे व्यवधानवावि
तो नरश्राव्या नत्करोतीति णिविपचादेच्। प्रत्युदाहरणे तत्सवाचीउमयोरपि बहुव्रीहियोगो पसंख्याना
भावाच्छिद्रत्वाभावे पि त्वांदंतोदात्तत्वं बोध्यं। मुखं। अद्रुव मूर्त्तिमद् इ स्यादीति। कृत्रिमाकृत्रिमन्याये
न नाव्य। अनिगंतौ वत्सावितिसूत्रेण प्रवृत्तस्योदात्तत्वे सति एकादेश स्वरेण प्राङ् शावत् उदात्तः। प
क्षो स्वरितो वेति स्वरितोपि अत्राव्ययीभावा स्यात् अव्ययत्वेन ग्रहणं भवं तिन वा। आद्यपेसे उपा
ग्नि पुरवः प्रत्यग्निमुखवदित्यादि मुखस्यांतोदात्तत्वभावपूर्वपदप्रकृ। तस्वरेणाग्निशब्दस्योदात्तत्वं द्वितीय
पक्षे स्वशावस्योदात्तत्वं। इदं पसहूपं अव्ययीभावश्चेति सूत्रे भाष्यके पदयोः स्पष्टे। निष्ठे। कृदुहेणपा

परिभाषया प्रक्षालितशब्दस्य निष्ठांतत्वं। गोमुखमिवेत्यादिना पूर्वसूत्रस्य विषयः प्रदर्शितः। गोरिवेति

३६ 36 इदं पूर्वसूत्रेकाया मुक्तं भाष्येनैतदिति। तस्मादप्रमाणमित्यर्थः। तथा च निषेधं बाधित्वा परत्वादिक

स्यात् गोमुखादेः अंतोदात्तत्वं वा· तदभावे पूर्वप्रकृतिस्वरेण गोमुष्टिवत्सा अंतोदात्ताः जाति। उदाहर

णेषु निष्ठांतस्य पूर्वनिपाते प्राप्ते अत एव ज्ञापकाज्जात्यादिभ्यो निष्ठायाः परनिपातः जाति। उदाहरणे

षु निष्ठांतस्य पूर्वनिपाते सारंगज[illegible]पक्षिविशेषः जग्धो भक्षितो येनेति विग्रहः। वाजा। अंतोदात्तं सुख

मिति· एवं दुःखं। कृतेश्छ कू चेति। कृतेरकु प्रत्ययः स्यात् कृते स्तत्संनियोगेन छक् आगमः कृ आ

देशश्च इत्यर्थः। प्रतीपशब्दो बहुव्रीहिस्वरेणाद्युदात्तः हरदत्तोक्तप्रकारेणैते सुखादयः सुखादिभ्यः कृ

ते इति सूत्रे शब्दकौस्तुभे तु अत्र श्लोकगणकारः सुखदुःखगहनकृच्छ्राः तस्मालीकप्रतीपकरुणा

श्च। कृपणसोढ इतीमे सुखादयो दश गणे पठिताः। गणरत्नमहोदधौ तु आस्यशब्दोपीह पठ्यते

इत्युक्तं। न भुबहुचरइति। बहोर्नञ्वदुत्तरपदस्योदाहरणत्वं। ज्ञापकादिति। ननु कथमिदं ज्ञापकं। अ

जकरः बहुजरकः सुकर्मकः सुश्रोतस्कः। सुकृतुकः सुरथकः सुवीरकस्यादौ उत्तरपदाद्युदात्तत्वबाधा देरव

य अस्यावश्यकत्वात् अत आदत्र आस्मिन्नेवेत्यादि। अन्यत्रेति। बहुव्रीहाविदमेतन्न्यायइत्यादेः। भष्यवा

र्त्तिकाभ्यामिति सस्यांत उदात्तः उत्तरपदस्येति संदिग्ध आद्यपक्षे बहुव्रीहाविदमिति सूत्रे कपिचे ३६

ति वक्तव्यं इदं प्रथमके इति सिद्ध्यर्थमिति दूषणमुक्त्वा द्वितीयपक्षे अनच्चो बहुच्च रतत्र समासांतो

दात्तत्वं न स्यात् इति दूषणमुक्तं। तत्रास्मिन्सूत्रे समासस्य कार्यित्वे उत्तरसूत्रस्य ज्ञापकस्योपन्यासाद् अन्यत्रो
दात्तपस्य कार्यित्वाभीकाराद्वितीयः पक्षः स्थापित इति प्रतीयते। नन्विदं ज्ञापकं बहुव्रीहाविदमेतद् इति
सूत्रे एङ्व उत्तरपदस्य कार्यित्वं अन्यत्र सर्वत्र समासस्य कार्यित्वं इदं ज्ञापकमस्तु इति चेन्न। अंतोदा
त्तत्वं समासस्येति चेत् कप्युपसंख्यानमिति सामान्यतोदोषमुक्त्वा उत्तरपदान्तोदात्तत्वे नञ्सुभ्यां स
मासान्तोदात्तत्वमिति नञ्सुभ्यां विशिष्य दोषाभिधानात् कपि पूर्वमित्यत्र नञ्सुभ्यामित्यनुवर्तनादे
तत्सूत्रविषय एव ज्ञापनस्य युक्तत्वात्। ज्ञापनं युक्तमप्युक्तं वेत्यन्यदेतत् भाष्यवार्त्तिकाभ्यां स्वरसात्त
पदमंजर्यामप्येवमेव प्रतीयते। अप्पूरणीप्रमाण्योः। स्त्रीलिंगेन नाः पंचमी आसां ताः सुपंचमाः सुप्रमा
णाः अत्र नञ्सुभ्यामित्यन्तोदात्तत्वं न भवति अपः पील्व सामर्थ्यात्। तेनात्र पूर्वपदप्रकृतिस्वर एव
। तत्र स्त्रीनिर्देशात् शोभनः पंचमो येषां ते सुपंचमाः सुप्रमाणा इत्यत्राव भावे इदमन्तोदात्तत्वं भ
वत्येव। कपि उदात्तः स्यात् स्यार्थः बहोर्नञोजरमरेत्यत्रास्यार्थ उक्तः बहुयवैः। बहुश्चंद्र इति नञ्सुभ्या
मित्यस्योदाहरणं। बहुकुमारीक इति। तत्र उत्तरस्य। बहुपवक इति तो प्युत्तरस्य बहुज्ञाक इत्यादि
तीयवाक्यार्थस्य। प्रातिपदिकस्वरेणेति। लथिवं सान्चे लोपश्चेति किं प्रत्ययांतत्वेनापीति ज्ञेयं। अर्द्ध
मात्रालाघवेपि बहोः सुवदिति नोक्तं बहुनरः बहुमर इत्यत्र नञोजरमरेत्यस्य प्रवृत्त्यर्थं। बहुप्र
थिमा बहुयवा इत्यादौ सोमनसी इत्यस्याप्रस्याप्रवृत्त्यर्थं च। बहुगुणका अत्र कपि पक्षे

वेदकृत्स्वान्ते त्वात्स्वर्वेमित्यापि न भवति। गुणसंख्याने इति हरदत्तोक्तिश्चिंत्या। एवं धातुत्वभावात्। अत्रोऽस
३७ रन् इति। अश्नोतेर्वा सरो अक्षरमिति पदस्य ग्रंथे भाष्ये। तत्र कैयटः। सरन्प्रत्ययस्यानुबंधलोपे कृते अनु
37 करणं सर इति एवं च नित्त्वादाद्युदात्तत्वं। अत एवाग्रे भाष्ये वर्णे चाहुः पूर्वसूत्रे तत्र कैयटः कृद्धिरिपंच
र्णस्येत्यर्थः पूर्वव्याकरणे वर्णा अक्षराणीति वचनादिति। एवं तु नञ्पूर्वपक्षस्येत्याद्युदात्तत्वेन भाष्यं
।छंदोमानं कृत्स्वरेणान्तोदात्तं। सूक्ष्माध्यायोथाथादिस्वरेणांतोदात्तौ। उपा। तत्पुरुषे इति। श्रो
द्रादौ छिन्त्रि। उत्तरपदादरणमयुक्तं। छिन्ति स्यां पमृड इति सूत्रे विकल्पाधिकाराभावात्॥ किंच पक्षो
आद्युदात्तत्वं न प्राप्नोति। परत्वादस्मिन्नंतोदात्तत्वे कृते पदप्रकृतिस्वरेणाद्युदात्तत्वे च कृते सति
त्रिष्टत्वा तस्य प्रसपस्वरेणांतोदात्तत्वं प्राप्नोतीत्ययं विकल्पो स्त्विति चेत्। एवमपि षविधानं व्य
र्थमेव। ननु वित्स्वरः कैनापि न बाध्यते इत्यर्थे षविधानं ज्ञापकमस्तु। धिक्त्वस्यासमर्थ्यादेवस्यार्थस्य
सिद्धत्वान्न त्रव्यापकापक्षा। न स्मात्स्वविधानं पथोक्तमेवार्थे ज्ञापयति वित्त्वाभावादिति पूर्वे षःप
श्वात्स्वर इति भावः। इदं मूले एव स्फुटी भविष्यति। सकथ्यं। षजंत इत्युक्तिः। नञ्सुः सुभ्य इति अजंतस्तू न
गृह्यते। तत्र क्तांतोत्तरत्वाभावात् क्तांतादितिग्रर्थं स्यात्। तेनासकथ्य इत्यादावंतोदात्तत्व ---- मेवं न
नु भयोग्रहणे क्तांतादितिसमर्थकं भविष्यति। एवं तद्विंव्याख्यानात्व्यवस्थित विभाषा विज्ञाना द्धन्द्वं
तोन गृह्यते। सकथ्याशब्द इति समासांतासमासावेयवा इति पक्षे उत्तरपदग्रहणं वाध्यादत्र नसंबध्यत ३७

इति स्थिते यं। चक्र सक्थ्यन्त्रीवत् इति समासान्ताः समासावयवा इति पक्षे उत्तरपदमेवेइति विचक्राकारं स।
क्थि यस्येति विग्रहः। बहुव्रीहिस्वरान्ते प्रसंगात् समासस्वान्तस्वरो विचार्यते· समासान्ता इति· विशेषवि
षविषयकं ज्ञायकमिति भावः। तस्य फलं समासान्तोदात्तत्वं बाधत एवेति। द्वित्रिभ्यां पाद्दन्मूर्द्धस्ति
सूत्रे द्विमूर्द्ध इत्यत्रोत्तरपदान्तोदात्तत्वे कृते षः। तस्य पश्चाज्जातत्वेपि ष्रेषः निघातेनानुदात्तत्वं
तस्मिन् टिलोपे उदात्तनिवृत्तिस्वरेणोदात्तत्वमिति भाष्ये उक्तं तेन न विरोधः। न तत्समासान्तोदात्तत्वं
किंतु उत्तरपदान्तत्वं एवं च समासपूर्वपदस्वरं न बाधते इत्यत्रोत्तरपदान्तोदात्तत्वं चेत्यपि ज्ञेयं। षष्ठ्
भाव तु भाष्यविरोधः। लक्ष्ये विसंवादाभावात्· अस्मिन्पक्षे समासान्तोदात्तत्वं तु बाधत एवेत्यत्रो
त्तरत्वदान्तत्वं चेत्यपि द्रष्टव्यं। षष्ठ्या पूर्वमिति। इदमेव ज्ञापनेयुक्तमित्याहुः। तोनह्ययोरिति· अन्य
था उत्तरपदान्तावयवत्वे पूर्वं समासान्ताः पश्चात्स्वराः। समासान्तानां वयवत्वे पूर्वं स्वराः पश्चा
त्समासान्ता इति भेदः स्यात्। समासार्थो नां सर्वेषामिति· तथा च भाष्यं· तादर्थ्यात्ताच्छब्द्यं भविष्य
ति एषां पदानां समासः न तावत्तेषामन्यद्भवति रूपं तावत्समतीस्ते इति· अत्र एषां पदानामिति संबो
क्तेन तूत्तरपदमिति बहुवचनं प्रयुक्तं यथा महिनो ऽकारः प्रत्याहारार्थत्वात्सर्वत्वात्सर्वेषामनु
बंधोनसेकैकस्यनापि महेः। तेन वश्विवहे वश्मिमहे इत्यत्र संप्रसारणं न तथा समासान्तामपि समा

३८ सार्थो नामवयवो नैकैकस्य नाप्युत्तरपदस्यैत्यवसिद्धांतः चित्वाबहुव्रीहिस्वरणमाह। आसन्नदशाइत्या
38 दि अयं न्यायः सर्वेष्वपि समासेषु निःकौशांबिरित्यादौ अव्ययपूर्वपदप्रकृतिस्वरः सावकाशः प्रग
तो ह्यानं प्राह्नोरथो इत्य ओपसर्गादि ह्नुनर इत्यचिवित्वादंतोदात्तत्वेन बाध्यते। एवं याज्ञिकाश्व इत्यादौ
सादौ मातुरिणे धर्मेहरणे पूर्वपदाद्युदात्तत्वस्य सावकाशस्य मातुलगव इत्यत्र चित्स्वरेण बाधः प्रा
प्तोपि न भवति। चित्स्वराद्बहुव्रीहिस्वरं इति वचनस्य वक्ष्यमाणत्वात्। परित्रिगर्त इत्यादावव्ययीभावे पू
र्वपदप्रकृतिस्वरः सावकाशः परित्रारदं इत्यत्राव्ययीभावे शरत्प्रभृतिभ्य इति रचिचित्वादंतोदात्त
त्वेन बाध्यते। एवं प्रकारेण स्वराः ह्रेयाः इह समासांतानामुत्तरपदावयवत्वं ज्ञाप्यपूर्वपदमंजर्यां
स्पष्टं। समासावयवत्वं अंत इति सूत्रे भाष्ये स्पष्टं। अत्रापि पूर्वपरत्वात्स्वराः पश्चात्ते। समासा
ता इति द्वित्रिभ्यां पाद्दन्न इति सूत्रे भाष्ये स्पष्टं प्रतीयते। अंत इति सूत्रे समासांता इति सूत्रे च पूर्वं
समासांताः पश्चात्स्वरा इति प्रतीतीयते भाष्ये स्पष्टं प्रतीयते। अंत इति सूत्रे सर्वेषां पदानामेव
यवा इति गोस्त्रियोरिति सूत्रे भाष्ये स्पष्टं। एवं समासांतानां त्रैविध्यं। तत्रोत्तरपदावयवादीनोदाहर हेरव
णादीनामियमुक्तिः। बहुजनस्य गोमत् जनस्य अस्यामवस्थायां प्रकृते एव समासे अलौकिके क्रिया
वाक्ये एवउत्तरपदस्यावयवीभूप समासांताः प्रवर्त्तंते। सचविभक्तेः पुरस्तादिसेकापरस्तादितिपक्षे ३८

तुतद्धितांतत्वात्सुब्लुक् पुनः सुपि च कृते समास इति। अत्रैवं वक्तव्यं· सर्वे पि तद्धिताः सुबंतादेवेति स्वयं
सिद्धांतितत्वात्कथं सुपः प्राप्तुत्पत्तिः परत्वात्पक्षे पि सुबंतग्रहणेन ग्रहणे सिद्धे सुब्लुत्पत्तेः किं प्रयो
जनं अथैकवचनमुत्सर्ग इति पक्षे विंभक्ति भक्तिर्भविष्यत्येवेत्याशयः तु हि पुरत्वात्पक्षे पि सु
पाभावे उभयथापि बहुवर्मिकाबहुघटिकाइत्यत्रासु प्रकृतिप्रतिषेधादित्वं कथं किं चासमा
सन्नावस्यतदवयवेत्वे उत्तरपदे लक्षणाभावः अन्यथा उत्तरोत्ताइत्येव वदेत्। उत्तरपदत्वे वा पद
दिविधावित्यत्रैव उत्तरस्थावुन उत्तरपदं गृहीष्यते अपथमिति सूत्रे द्विगुश्चेति अस्य पंचग
वमित्युदाहरणं दत्तं अत एव चाकाशं तोत्तरपदो द्विगुरिति वचने उत्तरपदग्रहणं सामार्थकं
।अंत थाथघञ्क्ति इति सूत्रे भाष्यके यद योः समासावयवाद् इति स्पष्टमेव प्रतीयते यत्तु समासां
ताइति सूत्रे भाष्ये द्विपुरी द्विधुरी अंद्धुराह् त्युदाहृतं तत्र अंकारांतोत्तरपद इति वाचनिकं स्त्री
त्वाभावे स्वाभाविकं स्त्रीत्वयाश्रित्य परवल्लिंगमिति स्त्रीत्वाभिप्रायेणेति तन्न द्धुले नोत्तरपदाव
यवत्वेना पाति किं चास्मिन्पक्षे बहुव्रीहावदिंमिति सूत्रे दूषणमुक्तमेव· समासात्स्वाकृत समासां
ता उत्तरपदावयवाइत्यप्रार्थस्य स्पष्टं भाष्ये प्रमाणं स्ति समो सार्वयव पक्षे स्य पृग्रहणात् बहु
वर्मिणीकाबहुगोमतीकाइत्यपि स्यात्। तथाहु घटाका इत्यपि स्यात्· बह्वार्थीकाबह्वार्थिकाइ
त्यपि स्यात्· कुर्थिका इत्येवेष्यते· तथा बहुकुमारीक इत्यत्र गोस्त्रियोरिति ह्रस्वत्वं प्रसज्येत तस्मात्

३९ तीपापक्षे अपमेवेत्येवकारः प्रयुक्तः। समस्यमानानां पदानामेतावयवाः संतः समासस्यैव फलि
39 तमिति॰ समासावयवपरेण सहन विरोधः। तत्पुरुषे इ प्रत्यय इति तत्र सुनेः किञ्चेत्यतः किदित्य
नुवृत्तेः किति इत्यत्र गुणो न। थाथादिति॰ केचित्तु नञ्चिषपत्वादाद्युदात्तमित्याहुः। सामिकृतमि
सामीति समासः स्वयं धौतमिति॰ स्वापत्तेनेति। स्नात्वाकालक इत्यत्र मयूरव्यंसकादित्वा
त्समासः कृन्मत्वलार्थ्या इति एतच्च सूत्रे गुणक्रियावाविभिः समासे अनियमेन पूर्वनिपाते
प्राप्ते कृत्यतुल्याख्यानां पूर्वनिपाते नियमार्थे तुल्यमहानित्यादौ सन्महदिति समासबाधेन
तुल्यशब्दस्य पूर्वनिपातार्थे अस्य कृत्स्वरस्य प्रतिपदोक्तसिध्यर्थे च॰ पण्यकंबलः पः। पण्यह
स्तीइति कुरुगार्हपत्येति सूत्रे भाष्ये वैतौ प्रयोगौ॰ अत्र तुल्यहस्ती भोज्यहस्तीत्यत्र च एतत्स्वरा
भावे समासांतोदात्तत्वं भवति॰ अत्रे कृत्यांशे प्रतिपदोक्तं नाश्रीयते एषृदादेरणेषुपण्यकंबलव्य
तिरिक्तेषु अयं स्वरो भवतीति कुरुगार्हपतेति सूत्रे एकेस्मिन्पक्षे प्रतीयते परं तु प्रौढिवादः सा गति
अयं योगाविभज्यते॰ पू सूत्रे पूर्वपदमिति वर्त्तते॰ द्वितीयसूत्रे तु न संबध्यते। लक्षणांतरप्राप्तस्य
थाथादिस्वरस्य बाधनार्थत्वात्। कार्मणि क्तांत इति वर्त्तत एव। अनंतरो अव्यवहितः केनाव्य हेरंब
वहितः पंप्रति गतित्वं तदेतदाह क्तांत धातुनेति॰ समाहतमित्यादौ समादीनां पूर्वसूत्रेण प्राप्तस्य ३९
वारणेन थाथाथादिस्वरप्रवृत्त्यर्थे नियमार्थे तु न भवति योगविभागवैयर्थ्यापत्तेः। नियमापेक्ष

पाविधेर्य्यार्थस्त्वाच्च। अथवा एक एवायं योगः पूर्वसूत्रादनुपसर्ग इति मण्डूकप्लुत्यानुवर्त्तते तेनैव स
मासादीनां वारुणे सिद्धे अनंतरग्रहणं समासांतरे कृत्स्नात्तरप्रसक्तस्य थाथादिस्वरस्य बाधनार्थं
तत्सामर्थ्यादत्र सूत्रे पूर्वपदमिति न संबध्यते कर्मण्युपसर्गे कांते परे अनंतरो गतिः प्रकृत्यादि
ति सूत्रार्थः। कै पटे योगविभागपक्षस्योक्तत्वात् मूले तस्यैवोपन्यासः कृतः। अहृतं आगत इत्या
दौ कर्मे। पिकैर्बोध्यः। अधी। से सति समासे सतीत्यर्थः नेष्यतो इत्यलीति। समासः समासांतोदा
त्तत्वं च नेष्यत इत्यर्थः। हरि कृर्सं के स्मरणे उभयमिष्यते ल्वट् हृ। भावे ल्युटीत्यादि। शेष षष्ठीति भा
वेऽधिकरणे च ल्युटी सर्वत्रेत्यर्थः। तृन्निवृत्त्यर्थं चेति बहुशब्दात्समासनिवृत्त्यर्थं चेत्यपि द्रष्टव्यं। किं
च हरेरिति। न लोकेति सूत्रेण लादि योगे कारक षष्ठी निषेध्यते। शेष षष्ठी तु भवत्येव। तत्रानेन
समासो निषिध्यते। स्मर्त्तेत्यत्र तृन्। तत्र हरिस्मारन्नित्यादि कदापि न भवति। स्माकरः स्मर्त्तेति। एवुल्क्
वो अत्र किंचिद्वक्तव्यत्वात्पूर्वस्माद्दास्य पृथगुपन्यासः। तदा हृः कर्मणि लिति। कृत्र। उपस्करणमि
ति। उपात्प्रतिपन्नेति सुट्। अन्यत्रोति। शेषणे समासाभावाच्छामगुणानेठकर्मषष्ठ्यां गुणाधाने च।
अत्र स्वरं व्युत्पादयति शेषेति। अंतोदात्तत्वमेवेति उदाहरणे समासाभावात्प्रत्युदाहरणे इतिबो
द्धव्यं। रुजा बोरस्येति। रोगकर्तृका चोरसंबंधिवे निर्रुजेत्यर्थे रोगस्य चोररुजेति समासस्तदंतो
दात्तत्वं च नेष्यत इत्यर्थः। रुजानामाद्रो व्याधौ रुदो नमरणे लिः चोरमरणमिति प्रत्युदाहरणं। प्रत्युदाह

रणेषु शेषषष्ठीसमासे तोदात्तत्व॰ उदाहरणे वेति वार्त्तिके संज्ञाब्दोच्चारणादत्र समासो न भवतीत्यर्थः
४० आत्रिआत्रि पिनेष्यत इति॰ अंतोदात्तत्वमित्यर्थः। कर्मषष्ठीसमासे भावे ल्युटि अंतोदात्तत्वमेवे
40 त्यर्थः॥ ज्वास्ति॰ सर्वपूर्वपदादेरणेष्विति॰ उदाहरणेषु प्रत्युदाहरणेषु चेत्यर्थः। व्यवापथायोगमिति॰ श्ला
लाकाव्यवहार इत्यत्र थाथादिस्वरः। अन्यत्र कृदुत्तरपदप्रकृतिस्वरः। तत्रैवानो भावे लित्स्वरः ज्ञो
विदर्थ॰ सर्पिसेवं धीति॰ अस्मिन्नर्थे समासः अंतोदात्तत्वं चनेष्यते॰ विदर्थो शेषषष्ठीसमासो नांतो
दात्तत्वं चेष्यते॰ विदर्थे कर्मषष्ठीसमासे अविदर्थवत्कृत्स्वरो भवत्येव। कृत्वो॰ अधिकरणे इत्या
दि॰ इदं कृत्वोर्था प्रयोगे पिवोध्यनति॰ अंतोदात्तं स्यादिति॰ द्विवचनविभक्त्येति सूत्रे कपटे परस्मा
न्निर्द्धार्यते॰ यश्चैकदेशो निर्द्धार्यते यश्च निर्द्धारणहेतुरेतत्त्रितयसन्निधाने निर्द्धारणं भवतीति तत्रै
वायन्निषेध इत्युक्तत्वात् अत्र समासांतोदात्तत्वेन भाव्य॰ तदा नृणां द्विजः श्रेष्ठ इत्युदाहरणं न द्विजः
श्रेष्ठ इत्यत्र पूर्वपदप्रकृतिस्वरेण आद्युदात्तत्वे॰ पू॰ र॰ इष्यत इति॰ स्वरितांतमिष्यत इत्यर्थः। नेष्यत
इति॰ उयोत्तमोदात्तमेव नेष्यत इत्यर्थः तथा हि॰ शेषषष्ठीसमासे तव्यातास्कृतेतोदात्तत्वेन भाव्यमेव॰
नत्र तव्येन प्रतिषेधो व्यर्थः। तृ॰ ज॰ कर्मषष्ठ्या इति। शेषषष्ठ्यास्तु नापेनिषेधः। एतच्च गलिका हेरंब
रकोपपदादिति सूत्रे देवदत्तस्य कारकं देवदत्तकारकमिति भाष्योदाहरणात् तत्रकैयटेनोक्तत्वात् ४०
च। नेष्यत इति॰ अंतोदात्तत्वं इष्यते ओदनस्य कर्मत्वे ओदनपक्तेति नेष्यते शेषषष्ठे। लिष्यते॰ एवं

प्रकारेणेति। तथा हि॰ कर्तरि च कर्तृषष्ठ्या अपवे नन समासः भवतः अणयिकाधात्वर्थनिर्देशो ण्वुलः शेषषष्ठी
समासे तो दात्तमिष्यते॰ कर्तृषष्ठीसमासे कृत्स्वरेण भ्रंशस्य मध्योदात्तत्वं स्यात्। तच्च नेष्टं। तथा पुरणेति सूत्रेस
हितार्थैः शेषषष्ठीसमासनिषेधः न लोकेति सूत्रेण कारककारकषष्ठ्या निषेधात्। फलानां तृप्तः सुहितो वा
समासे तोदात्तत्वं स्यात्। शेषत्वेन विवक्षायां करणे तृतीया कृत्करणे कृते ति समासे कृते थाथादिस्व
रापवादस्य तृतीया कर्मणी ति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं भवति फलतृप्तः फलसुहित इति॰ एवं ददाति
दधात्योर्विभाषा शः ददः दधः। पक्षे आदन्तत्वात् श्याद्व्यधेति णः दायः। धायः ददानः। दध धारणे आभ्यां
पचाद्यचि ददः दधः इति सिद्धौ दाधाभ्यां पोदायः धायः इति सिद्धौ शविधाने अददः अदधः इत्यत्र काव्यका
विस्तं तोदात्तत्वं स्यात् पूर्वपदप्रकृतिस्वरप्रकृतसर्थ्ये एवमादयः स्वरप्रकाराः। वर्णो आद्युदात्त इति॰ अव्यु
त्पन्ना वितिवर्णानां तणेसाद्युदात्तः। गाधा अरित्रं नौकाष्ठं तस्या गाधं स्थानमुत्तलं। गाधप्रतिष्ठाया
मित्यस्मात् कर्मणि घञर्थे कविधानादित्वात् कः। वृत्तं। दाया॰ संवं धसमासान्ते इति षष्ठीसमुद्भायते॰ मूलवि
भुजादित्वादिति॰ आङ्पूर्वेदाद्दातोनुपसर्गे कः इत्य आमत्वात्। प्रति। विशेषणेति सुजतस्वभावमात्रवा
चित्वा विरक्तकृच्छ्रयोः कालके ष्ठवा चितेयि प्रकृतौ चिरकालमा विनिकृच्छ्रयोगिनि बाधे विरकृच्छ्रयोर्वर्जनात्सामाना
धिकरण्यं एवमपि विरकृच्छ्रयोर्विशेषणत्वात् पूर्वनिपातः प्राप्नोतीत्यत आह। मयूरेति। मूत्रकृच्छ्रमिति षष्ठीसमा

सः॰ नि वा॰ अव्ययीभावपक्षे कुधादिसामानाधिकरण्यार्थमाह॰ कुधादीति॰ कुधादिहेतुको वातस्याभाव इत्यर्थः
४० पार्श्वे रूढ इति॰ प्रत्युदाहरणे एवेदं तत्रानुकूलादिवाधथा कथं विस्तुत्यत्तिः कार्याः॥ २०२॥ नूतनवाचीति प्र
त्युत्पन्न इत्यर्थः॥ अह्ना अह्नरं यन्त्रं पातीत्यह्नयुः॥ मगव्यादित्वाविकु प्रत्ययः॥ ३॥ विशेषः॥ कठेन प्रोक्तं
५१ छन्दः अधीयते नोध्वर्युरिति विग्रहमात्रमस्ति शब्दस्त्वयमित्याह॥ चरणविशेषाध्येतृविशेषे इत्यर्थः॥ कषा
यस्यार्द्रं चेदित्वात्लक्ष्मीबलं पुंस्त्वं च॥ सदृ॥ मातृपितृशब्दाविति॥ अंबार्थत्वान्मातृशब्दोंतोदात्तः॥ उनर्वनं
तानामित्यस्यानित्यत्वात्पितृशब्दः प्रातिपदिकस्वरेणान्तोदात्तः॥ ननु सदृशशब्देन षष्ठीसमासोनभिधा
नान्न भविष्यतीत्याशंक्याह॥ अलुक् षष्ठीति॰ ननु दास्याः सदृश इत्यत्रासमास एवास्त्विति चेत्॥ न स्व
रद्वयप्रसंगात् यद्येवं तृतीयासविधायके पूर्वसदृश इति सूत्रे सदृशग्रहणं मास्त्विति चेत्॥ न॰ यत्र षष्ठ्या
र्थो नास्ति तदर्थं सदृशग्रहणं कर्त्तव्यं॥ विद्यायाहेतुना सदृशः विद्यासदृशः अलुक् समासार्थं च मनसा
सदृशः द्विगौ॥ प्राव्या सदा समम् इति समानां समानां समाहारः सदा समं॥ उपसर्जनं च॥ द्रूस्वत्वं॥ गत हेरंब
॥सप्तमीति॥ एवं च गंतव्यांशे सप्तमी पूर्वपदप्रकृतिस्वरे सिद्धे गतव्यग्रहणं व्यर्थं स्यात्॰ तस्मात् षष्ठीसमा
सः॥ मात्रो॥ उपज्ञायते इत्युपज्ञा॥ आतश्चोपसर्गे इति कर्मण्युङ्॰ उपक्रम्यते इति कर्मणि घञ्॥ नो ४०
दात्तोपदेशस्येति वृद्धिनिषेधः॥ वाकेनाधाविख्यासाया अनवगमान्नित्यसमासः॥ सुखं॰ गमनसुखमि

ति॰ गमनस्य विशेषणत्वात्पूर्वनिपातः। मयूरव्यंसकादित्वं वा द्रष्टव्यं ग्रीतो॰ योगविभागो यथासंख्यनि
वृत्त्यर्थः। इह सुखप्रिययोरित्येव पूर्वसूत्रे कृत्वादिति वितिवक्तव्यं। तत्राद्ये सूत्रे सुखप्रिययोः प्रीत्य
व्यभिचारादेव प्रीतो गम्यमाने भविष्यतीति तत्राह सुखप्रिययोरित्यादि॰ ब्राह्मणच्छात्रो इति ब्राह्मण अपल
क्षण। ब्राह्मो जातावितिजातौ टिलोपाभावो ऽन्निति प्रकृतिभावाह्नो योनाप त्याः कृदृन्ते इति। पचद
इणसिञ्जिदीङुष्यविभ्यो नक् इति णनक्। इनः प्रभु। तेन सह वर्त्तते इति सेना। अस्मिन्नपि पक्षे बहुव्री
हिलोदाघुदान्तः। नमूड प्रत्यय इति॰ अदृहदृ इति उप्रत्ययान्तो निपातः। आशंसा। अस्ति त्वेति॰ इदं तु का
शिकायामुक्तत्वादुक्तं। ओकेलुकेट को तिकः प्रत्ययसंभावनमिति प्रसिद्धिः। गमनाशंकमित्यादौ
क्रियाविशेषणत्वात् क्लीबत्वं। अतिशायने ति॰ द्वयो रंतिकयोर्गमनयोर्मध्ये एकस्यातिशाय वि
वक्षायामीयसुनि अंतिकबाढयोरिति नेदादेशः। विशेषणसमासे आशंकादीनां पूर्वनिपातः
प्राप्नोतीत्यत आह मयूरेति। पूर्वैः आढ्य आब्ध इति। मात्रोपज्ञेति सूत्रे उक्त प्रक्रिययेति भावः। स
विसविधाद्यो बहुव्रीहित्वादाद्युदात्ताः। सामान्येन नपुंसकं। वोपसर्जनस्येति सहस्य स भावः। विस्प।
पदिगतौ विलिउण् दिवृत्तौ तु पणव्यवहारे स्तुतौ च। मेतावद्। पंडा बुद्धिः सा संजाता अस्य तारका
दित्वादितच् एवमुक्तं वपसो लवने इति चिपमक्षायां गतौ। अस्मात् चुपरे ब्रोपधायाइति कलः। अत्रा

पिचिदिति वर्त्तनादंतोदात्त एव च पत्नः। अज्या पापवदिति पापशब्द वदित्यर्थः। तस्य तत्पुरुष पदत्वसंभवः
५२ ननु पापशब्दस्य गुणवाचित्वाद्गुणिवाचित्वाच्च केवलगुणोपसर्ज्जनद्रव्यवाचित्वाभावात् जातेः कथमि
५२ त्याशंक्याह विभ्रमतो लुक् इति। आदि। प्रतिगतमिति। अवादयः क्रुष्टाद्यर्थे तृतीययेति तत्पुरुषः। अ
व्ययपूर्वपदप्रकृतिस्वरेण येन स्वरेण प्राप्तः स स्वर आदेशो भवतीति सूत्रार्थः। एवं स्थिते फलितमा
ह कुमारस्यादिरुदात्तः स्यादिति। एवं सति कुदात्तस्वरितग्रहणे पूर्वपदविशेषणे अनुवर्त्तमाने पि वि
धानार्थस्योदात्तग्रहणस्यानधिकारात् कुमारस्यादिरुदात्त इति छांदसः प्रयोगः। तत्र जसादिषु
छंदो वा वचनं प्राङ् णौ चङ्युपधाया इति वचनाद्गुणाभावे यण्। बहिरंगलक्षणत्वेनेति विभक्त्युत्पत्तेः
प्रागनेन स्वरेण भाव्यं। विभक्त्युत्पत्त्यनंतरं यणगुणयोः प्राप्तिरिति बहिरंगत्वं। यङ्यायङ्यायण् गु
णयोः कृतयोरपि तयोर्विभक्तिनिमित्तत्वाद्विभक्तिनिरपेक्षस्वरं अंतरंगप्रति बहिरंगत्वं। स्थानि
वद्भावादिति स्वरविधौ स्थानिवद्भाव इत्यादौ नेति निषेधो नास्ति स्वरदीर्घयलोपेषु लोपाजादे हेरंब
शेन स्थानिवदिति वचनात्। बहु बहुहुकपालानीति कर्मधारयः बहुव्रीहिर्न प्रत्युदाहृतः कर्म
धारयाधिकारात् तत्वे तुल्यार्थो यं बहुरश्चः। तेन दिक्संख्ये संज्ञायामिति नियमो न प्रवर्त्तते। दिष्टि ५२
ते नेति। प्रमाणे लोहितो नित्यमिति वार्त्तिके प्रमाणत्वेन पतत्सिद्धं तस्य ग्रहणान् प्रकृते तत्रस्य सत्वात्।

मात्रं चरति। प्रथमश्चरद्विति यश्चोर्ध्वमाने मतौ मनेतिवचनादत्र द्वयसज्दघ्नचोरभावात् अत्रापि स्वे अं
तोदात्तत्वं बोध्यं। सह। अंतोदात्तावितिः उपलक्षणमिदं सांकाश्यकांपिल्येति सूत्रोक्तप्रकारेणा त्रस्व
रितपाः। था। थादिति स्विद्गृमुष्कपक्षा नांक्षांतत्वात् वं पस्य पत्रं तत्वात्। मह। अत्र पंचसूत्राणि द्वंद्वा
व्ययीभावविषयत्वात्सकानि महे घासइति। एकार एकादेश स्वरेणोदात्तः स्वरितो वेति स्वरितो वा
क्षुद्रकुलानानुवर्त्तितमिति युक्तं चैतत्। अन्यथा तत्पुरुषप्रकरणमध्ये परिप्रत्युपापेति पंचसूत्री न
कृता स्यात्। किंच प्रतेरंश्वादयइति चतुःसूत्री अंतः थाथादिस्वरप्रकरणे एव कृता स्यात्। एवं
हि तत्पुरुषग्रहणं न कर्त्तव्यं भवति। सिद्धत्वादिति। यत्र न मिष्यते तत्र प्रवर्त्तते। एवं हिरण्यपरि
माणमिति। व्याख्यानादिति षष्ठीसमासः कर्मधारयो वेति काशिकादावुक्तत्वादिति भावः। तत्पुरु
षविषयात्येवेति। अत्र गेत इति भावः। क्षुल्लमिति। आतोनुपसर्गे इति कः। सास्य देवतेत्यणि वेश्व
देवं कर्मगोः साल्वस्यादेवेति। गोषु सीदतीति विग्रहे भुड्डा लगांसदयतीति विग्रहेण्यंतात्सुप्यजा
ताविति णिनिः। कृञ्जा आघासदा समासः आघोस्तु लुगिति लुद् षष्ठीको इतरे षष्ठीस्थाने
प्रथमैकवचनांताः। अश्लीलेति श्रीः लावण्यं यस्या अस्तिसाश्लीला न श्लीला अश्लीला लाव
ण्यरहिता सा वा सीदति रूपासंनमात्रेण योगो भानेऽर्थः सिध्मादेराकृतिगणत्वात् लः। कपिञ्जलादि

त्वाछत्वं। पारे वडवेति पारेमध्ये इत्यव्ययीभावस्तु न भवति तथा सति सूत्रे दीर्घनिर्देशो ऽयुक्तः स्यात्।
४३ वडवायाः परस्याः संभवाच्च दासीभाराद् पश्ववत्वात्ः षष्ठीसमासाः ह्येवुपपदसमासो। तथा हि उ
43 पदाहे। धम्मिं ओषोदाहोदाम्नि धीयते स्यामिति कर्मण्युपपदे धिकरणे किः। चं चेमो ऽदिति मा धातो
रसि प्रत्ययः। चंद्र इव मीयते इति व्युत्पत्तिः चतुकृ इलेति। उणादिवृत्तौ तु कल स्तुय म्ये इति सूत्रे व
हुवचनात्कुडिदहे इत्यस्मात्कलड् प्रत्युक्तः। एवं च मध्योदात्तत्वमापाति। अर्थो मापाति। अर्थो
मात्रे इति। तादर्थ्ये चतुर्थी। तस्येव तादर्थ्यस्य गमितत्वाल्लोके ऽर्थशब्दाप्रयोगे पि अर्थशब्देन च
तुर्थीसमासविधानसामर्थ्यात् अलौकिके प्रक्रियावाक्ये उभयं कर्तव्यं। मातृणे अर्थ सु इति स्थिते
लुक्। गोहितमिति। हितयोगे चेति चतुर्थी। चतुर्थी चाशिषीत्यादिना वा। गोरक्षीलमित्यत्र संप्रदा
ने चतुर्थी इत्यत्र सूत्रे काशिकायां। तादर्थ्ये चतुर्थी तदर्थी चतुर्थी चाशिषीत्यादिना वा। गोरक्षा
र्थे इति सूत्रे भाष्यं। अत एवास्य सूत्रस्य ज्ञापकत्वं। ननु गोहितमित्यत्रादर्थे ऽस्यावकाशत्वात्क हेरंब
थं ज्ञापकं। नैतत्। हिते चेति वक्तव्ये चेति सामान्यवचनस्य ज्ञापकत्वात्। यदि त्वाधवाव्य
क्ते चैत्युक्तिस्तदा पूर्वसूत्रमेव ज्ञापकमस्तु। कर्माकृतावाधकृतमिति। कृपकृतादीनां चोपसं
ख्यानमिति समासः। काशिकायां तु कृतारकृतो मिति प्रत्युदाहृतं। तत्र हरदत्तः अनिष्ठे सनुत्यमा ४३

ने॰ नैव स्यात्। नञ्ण्यादिसमासाद्येकस्याक्तेन नञ्‌विशिष्टेति समासस्य प्रतिपदोक्तत्वादिति तन्न उत्त
रपदस्याक्तान्तत्वात्॰ प्रतिपदोक्त इति। यद्येवं किमर्थं कर्मधारयग्रहणं क्रियते स्पष्टप्रतिपत्त
र्थं। अहृ। हीनेत्यक्तेन हीनमहीनं। दुह्णमीति। कान्तारातीतइत्यत्राप्यनेनैव निषेधस्य सिद्धत्वा
त्। अहीनेऽइणा सिद्धत्वोरूढस्य सोपसर्गत्वादस्य स्वरस्याभावात्। थाद्येति॰ तथा च प्रत्युदाहर
णे थाथादिस्वर इति भावः। तृ‚ ली। न त्रुभ्यामिति। रवं तत्रमादेरिति वान्तोदात्तः। गति। पूर्वव्याख्या
ने। समावेशाभावज्ञापनादिति नित्त्वस्य ज्ञापनस्य मुख्यं फलं किं। न तावदिदं। अस्य तु यो गवि
भागेनापि सिद्धत्वात्। तथा हि। कर्मणि क्तान्ते परे गतिः प्रकृत्या तमुदात्तं वर्जयित्वा तस्य मनुदा
त्तं स्यादिति सूत्रार्थः। एवमुत्तरस्यापि। तथा च समासे यो रूढान्तत्वास्य ज्ञावुदात्तत्व यो
र्विरोधात् सूर्व सूत्रस्य संस्पष्टमिति सत्र सावकाशत्वात्। आङ्॰ एव स्वरस्य सिद्धत्वात्। अत ए
व समासान्तोदात्तत्वस्य बहुव्रीहि पूर्वपदस्य च समावेशत्साद्यानाप्रयोजनत्वं। अत एव च
दीर्घकाशेति अंत्यात्पूर्वमित्यस्य नैकदा प्राप्यान प्राप्यानप्रयोजनत्वं। न च त्वं। न च समाने
ख्यः स चोदात्तः अङि। श्रिदृनिभ्यां ह्रस्वश्चेत्यत्रेण प्रत्ययोदात्तत्वस्य सादेशोदात्तत्वस्य आ
ङो दृत्वादेशेणोदात्तत्वस्य वैकेन वसूत्रेण विधानोसूर्वस्याह्निशोषादिदं प्रयोजनमिति वा
च्यं। उ एयदी नामक्युत्सन्नत्वात् श्विअहिसरविशब्दानां षष्ठपादे राकृतिगणत्वात् घुदात्तत्वस्य

सिद्धत्वात्। स्युरित्यस्मिन्पक्षेपि आद्युदात्तश्चेत्यस्याधिकारत्वपक्षे इदं प्रयोजनं स्यात्। परिभाषापक्षे
तु नास्य मुख्यप्रयोजनत्वमिति चेत्। उच्यते। परिभाषाणामपि कार्यकालपक्षे ध्येकवाक्यत्वादेके
५५ न वाक्येन प्रत्ययादेश्चायोरुदात्तत्वविधानस्य सिद्धत्वात्। यथोद्देशपक्षेपि परिभाषाणां विधि
शेषत्वाद्विधिवाक्यैकभूतास्यात्। तदभावे सति शिष्टस्वरबलीयस्त्वे स्वराणां परत्वेनापवादत्वे
न च बाधकत्वं न सिध्येत्। एतावान् विशेषः। यथोद्देशे परिभाषा विधिशेषभूता विधिवाक्या
धीनं तद्भूतत्वात् स्वतन्त्रा वाक्यैकवाक्यतया प्रवर्त्तते। यथा क्षिदं तस्यादिरुदात्तः स्यात्तस्मिन्नपदे
तमवं वर्जेपि त्वाऽन्ययोऽनुदात्तः स्युरिति कार्यकालपक्षे विधिवाक्ये तद्भावात्तेन सदैकवाक्यताय
द्येर्गतां गस्य योत्तस्य गुणः मिदेरिके गुण इति। तथा यथोद्देशपक्षे पौर्वापर्ये त्रिपाद्या अदर्शनं
च सिध्यति। कार्यकालपक्षे पौर्वापर्याभावस्त्रिपाद्यां च प्रवृत्तिश्च सिध्यति। तस्मात्स्वरशब्दः
अपि हि अश्रिशब्दो मुख्यं यत्रं। किं चानुदात्तस्य पत्रेति सूत्रे तदिसस्यो मरार्थ समुवर्णनादनुदात्तग्र
हणस्याघर्थान्मादिद्विधुक्षाता जिस्यत्रा तामा। उभयोरप्याकारयोरनुदात्तत्वाभावः प्रयोजनं। तथा थ हरेव
लिचसेत्ती उत्तो वा इत्यत्र पर्यय ग्रहणाभावात् कदाचिदेकस्य कदाविद्वयोः त्रयाणां चतुर्णामपि
उदात्तनिवृत्तेः फलोत्तथा सुनुतद्वत्सोदेशतृ तत्र सौख्यावाचिन एकस्यैवोदात्तत्वं न। ननु अनु
एतत्पदमिति सूत्रे एकं उदात्तं वर्जवेर्जपिङ्क्तिर्जातेऽनेकं वर्जेपि वान्येषामनुदात्तत्वं न स्यात्तस्मात् ६ ५५
१ वा अनुदात्तविधानान्नात्रदीर्घ इति चेत्। न। तत्र संख्यावाचिन एकस्याग्रहणे युगपद्ग्रहणे नानेकस्या

र्ण्यरपोरत्रोदकत्राब्दयोरग्देरक्षरस्य अनुदात्तस्य स्वरितत्वं न भवति। ज्ञापकेन स्वरसंधिषु प्लुतस्यासिद्धत्वं ज्ञापितं
नुनुस्वरविधिं प्रतीतिकृत्र्यमेवेदं पण् खरबाधनमेवास्य सूत्रस्य करणे हेतुः कारणमित्यर्थः। इति वाक्यस्वराः
इति श्रीशेषकुलोत्पन्नेन नागोजी पंडितानां पुत्रेण रामचंद्रपंडितेन विरचिता स्वरप्रक्रियाव्याख्या समा
प्ताः॥ संवत् १८४८ वैशाख मासे शुक्लपक्षे ४ वार शनिचर ७ ७ ७ ७ ७ ७ ॥



स्वरप्रक्रियाव्याख्या
ब॰२५

